## विंशः पाठः

# वेधशाला

पत्रलेखनं भाषणकला इव एका लेखन-कला वर्तते। लिखितरूपेण कथनीयाः अंशाः सङ्क्षेपेण लिख्यन्ते। सरलसुन्दरपदविन्यासैः सङ्क्षेपतः समग्र-लेखनं महत्त्वं भजते। व्यक्तिविशेषानुसारम् उपोद्घातः उपसंहारः पत्रलेखनस्य वैशिष्ट्यं भवति। अत्र पत्रमाध्यमेन उज्जयिन्याः वेधशालायाः वैशिष्ट्यं प्रस्तुतम्।

**शासकीय-उच्चतर-माध्यमिकविद्यालयः**
**शामगढ़नगरम् ( मध्यप्रदेशः )**

***प्रियमित्र ! तपन!***

**नमस्ते**

अहमत्र कुशली, भवतः कुशलताञ्च कामये। मम अध्ययनं सम्यक् प्रचलति। मम विद्यालयस्य त्रैमासिकपरीक्षायाः परिणामः आगतः। मम परिणामः उत्तमः।

विगतसप्ताहे विद्यालयस्यैका शैक्षणिकयात्रा प्रवृत्ता। अहं संस्कृतशिक्षकस्य निर्देशने छात्रैः सह उज्जयिनीं गतवान्। उज्जयिनी भारतस्य अत्यन्तं प्राचीनम् इतिहास-धर्म-दर्शन-कला-साहित्य-योग-ज्यौतिषादीनां च केन्द्रमासीत्। एषा अवन्तिका, विशाला नाम्नापि शास्त्रेषु वर्णिता अस्ति। अत्र सर्वत्र पुरातात्विकं वैभवं दृष्ट्वा मनसि आनन्दो जायते। भगवतः महाकालस्य पुरीयं देशे श्रद्धायाः केन्द्रमस्ति। अत्र भव्यं महाकालेश्वरमन्दिरम्, हरसिद्धिमन्दिरम्, गोपालमन्दिरम्, महर्षेः सान्दीपनेः आश्रमम्, गढ़कालिकामन्दिरम्, कालभैरवमन्दिरम् अन्यानि चापि सिद्धवट-अङ्कपात-मङ्गलनाथ-कालियादाहभवनमित्यादि दिव्यस्थानानि अस्माभिः अवलोकितानि; किन्तु वेधशालां दृष्ट्वा वयं सर्वेऽपि आश्चर्यचकिताः सञ्जाताः।

मित्र! आङ्ग्लभाषायां वेधशालाम् "अब्ज़र्वेटरी" इति वदन्ति। जनाः वेधशालां "यन्त्रभवनम्" अपि वदन्ति। एषा वेधशाला उज्जयिन्याः दक्षिणभागे क्षिप्रायाः उत्तरतटे उन्नत-भू-भागे स्थिता अस्ति। प्राचीनकालात् एव उज्जयिनी ज्यौतिषविद्यायाः प्रमुखं केन्द्रम्। कर्करेखा इतः एव निर्गता। इदं स्थानं गणितस्यापि आधारस्थलम् अस्ति। अष्टादशशताब्द्यां राज्ञा जयसिंहेन ज्यौतिषानुरागवशात् वेधशालानिर्माणं कारितम्। ग्रहाणां प्रत्यक्षवेधनाय जयसिंहः उज्जयिन्याम्, काश्याम्, देहल्याम्, जयपुरे, मथुरायां च वेधशालानां निर्माणं कारितवान्। सः वेधज्यौतिषमधिकृत्य एकं ग्रन्थम् अपि रचितवान् इति श्रूयते। तेन अत्र एकम् उपनगरम् अपि निर्मितम् अधुना अपि जयसिंहपुरा इति नाम्ना तद् विख्यातमेव।



इयं वेधशाला जीर्णशीर्णा आसीत् परं पं. सूर्यनारायणव्यासस्य प्रयेत्लने वधशालायाः जीर्णोद्धारो जातः। अत्र विद्यते सम्राट्यन्त्रम् एतेन सूर्योदयात् सूर्यास्तं यावत् स्पष्टसमयो लभ्यते। अत्र स्थितेन

दिगंशयन्त्रेण ग्रहाणां नक्षत्राणाञ्चापि दिगंशो ज्ञायते। ''नाडिवलययन्त्रेण'' ग्रहनक्षत्राणां दक्षिणायनं विज्ञातं भवति। ''दक्षिणोत्तरभित्तियन्त्रेण'' ग्रहनक्षत्राणां मध्याह्नवृत्तागमनसमये नतोन्नतांशयोः परिज्ञानं सञ्ज्ञायते। ''पलभायन्त्रेण'' छायायामपि समयस्य सम्यक् ज्ञानं भवति।

वस्तुतः वेधशालां वीक्ष्य मनसि गौरवमनुभवामि यत् प्राचीनकालेऽपि अस्माकं पूर्वजानां गणितस्य, ग्रहनक्षत्राणाञ्च ज्ञानम् अद्भुतं वैज्ञानिकञ्चासीत्।

इदानीं पत्रं समापयामि। यदा अवसरः लभ्यते तदा एकवारं ज्ञानविज्ञानस्य पुरीयम् उज्जयिनी अवश्यमेव दृष्टव्येति।

शम्।

**भवतः कुशलापेक्षी**
**राजेशः**

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| कुशली | – | कुशलपूर्वक | इतः | – | यहाँ से |
| कामये | – | कामना करता हूँ | वेधनाय | – | परिज्ञान के लिये |
| सम्यक् | – | ठीक प्रकार से | श्रूयते | – | सुना जाता है। |
| शास्त्रेषु | – | शास्त्रों में | जातः | – | हुआ |
| मनसि | – | मन में | वीक्ष्य | – | देखकर |
| दृष्ट्वा | – | देखकर | इदानीम् | – | अब, इस समय |
| सञ्जाताः | – | हो गए | पुरीयम् | – | यह नगरी |
| क्षिप्रायाः | – | क्षिप्रा नदी के | दृष्टव्या | – | देखनी चाहिए |
| उन्नतभूभागे | – | धरती के ऊँचे भाग पर | | | |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) उज्जयिनी कस्याः विद्यायाः प्रमुखं केन्द्रमस्ति ?

(ख) वेधशाला कस्याः नद्याः तटे स्थिता अस्ति ?

(ग) उज्जयिनीतः का रेखा निर्गता ?

(घ) कस्य प्रयत्नेन वेधशालायाः जीर्णोद्धारो जातः ?

(ङ) वेधशालायां कस्य विज्ञानस्य बोधः भवति ?

## (2) एकवाक्येन उत्तरं लिखत –

(क) केन यन्त्रेण दिगंशः ज्ञायते ?

(ख) वेधशालानिर्माणं कदा केन च कारितम् ?

(ग) सम्राट्यन्त्रेण कः लभ्यते ?

(घ) नाडिवलययन्त्रेण कः ज्ञायते ?

(ङ) पलभायन्त्रेण कस्य ज्ञानं भवति ?

## (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) उज्जयिन्यां वेधशाला कुत्र स्थितास्ति ?

(ख) जयसिंहेन किमर्थं वेधशालानिर्माणं कारितम् ?

(ग) उज्जयिन्यां कानि-कानि स्थलानि दर्शनीयानि सन्ति ?

(घ) दिगंशयन्त्रेण दक्षिणोत्तरभित्तियन्त्रेण च कस्य बोधः भवति ?

(ङ) उज्जयिन्याः प्राचीननामानि लिखित्वा प्राचीनवैभवमपि वर्णयत ?

## (4) रिक्तस्थानानि पूरयत –

(क) राज्ञा . . . . . . . . . . . . . . वेधशालानिर्माणं कारितम्।

(ख) आङ्ग्लभाषायां वेधशालां . . . . . . . . . . . . . . इति वदन्ति।

(ग) एषा . . . . . . . . . . . . . . नाम्नापि शास्त्रेषु वर्णिता अस्ति।

(घ) . . . . . . . . . . . . . . रेखा इतः एव निर्गता।

(ङ) एतद् . . . . . . . . . . . . . . विज्ञानस्य उत्तमम् उदाहरणम् अस्ति।

## (5) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत–

उदाहरणम् –

| | | |
|---|---|---|
| | **वेधशाला क्षिप्रायाः दक्षिणतटे स्थिता अस्ति।** | न |
| | **उज्जयिनी ज्योतिषविद्यायाः प्रमुखं केन्द्रमस्ति ।** | आम् |
| (क) | वेधशालायाः निर्माणम् अष्टादशशताब्द्याम् अभवत्। | |
| (ख) | जयसिंहेन वेधशालायाः जीर्णोद्धारं कारितम्। | |
| (ग) | पलभायन्त्रेण रात्रौ समयस्य ज्ञानं भवति। | |
| (घ) | उज्जयिनी विशाला इति नाम्नापि शास्त्रेषु वर्णिता। | |
| (ङ) | उज्जयिनीतः कर्करेखा निर्गता। | |

## (6) सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत -

(क) पुरीयम् -------- + -------- = -------- ।

(ख) सर्वेऽपि -------- + -------- = -------- ।

(ग) कुशलताञ्च -------- + -------- = -------- ।

(घ) दृष्टव्येति -------- + -------- = -------- ।

(ङ) कालेऽपि -------- + -------- = -------- ।

## (7) उदाहरणानुसारं शब्दानां धातुं प्रत्ययं च पृथक् कुरुत -

| | शब्दः | धातुः | प्रत्ययः |
|---|---|---|---|
| **यथा** | **हतवान्** | **हन्** | **क्तवतु** |
| (क) | दृष्टवान् | | |
| (ख) | गतवान् | | |
| (ग) | कृतवान् | | |
| (घ) | क्रीडितवान् | | |
| (ङ) | खादितवान् | | |

## (8) अव्ययैः वाक्यानिर्माणं कुरुत -

**यथा-**

**जनाः वेधशालां यन्त्रभवनम् अपि वदन्ति।**

(क) सर्वत्र

(ख) सम्यक्

(ग) अधुना

(क) यावत्

(ङ) यदा

## ( 9 ) उदाहरणानुसारं शब्दानां विभक्तिं वचनं च लिखत –

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा | यन्त्रेण | तृतीया विभक्तिः | एकवचनम् |
| (क) | अस्माभिः | | |
| (ख) | कालात् | | |
| (ग) | शास्त्रेषु | | |
| (घ) | प्रयत्नेन | | |
| (ङ) | विद्यायाः | | |

## ( 10 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | अष्टादशशताब्द्याम् | उज्जयिनी |
| (ख) | संवत् 1961 तमे | वेधशालानिर्माणम् |
| (ग) | अब्ज़र्वेटरी | जयसिंहेन |
| (घ) | जयसिंहपुरानिर्माणम् | जीर्णोद्धारम् |
| (ङ) | अवन्तिका | वेधशाला |

### योग्यताविस्तारः –

- भवतः मित्रस्य कृते पत्रं लिखत यस्मिन् भवतः नगरस्य वर्णनं भवतु !
- मध्यप्रदेशस्य अन्यानि कानि दर्शनीयस्थलानि सन्ति तेषां वैशिष्ट्यम् अन्विष्यत।

❖ ❖ ❖